# सिद्धान्तकौमुदी - १

## Program in which it is offered: [Integrated Masters – Vyākaraṇa]

**Course Category: [Core]** **Schedule of offering:2**

**Course Credit Structure: [5]**

- **Lecture: [5]**
- **Tutorial: [none]**
- **Practical: [none]**

**Contact Hours per week: [5]**

## 1. Introduction

व्याकरणशास्त्रस्य प्रतिपाद्येषु अंशेषु शब्दसिद्धिप्रक्रिया प्रधानभूता वर्तते । एकस्य शब्दस्य सिद्धौ अष्टाध्याय्याः विभिन्नेभ्यः प्रदेशेभ्यः सूत्राणि आदाय तेषु तेषु प्रसङ्गेषु कार्याणि करणीयानि भवन्ति । सैषा दुर्गमा विविधशब्दसिद्धिप्रक्रिया वैयाकरणप्रवरेण भट्टोजिदीक्षितेन सिद्धान्तकौमुद्याख्ये ग्रन्थे सुगमतया बोधिता । अपि च बहुषु प्रदेशेषु सूत्रवार्तिकभाष्याणां मतेषु भेदे दृश्यमाने यथोचितं सर्वमतानुकूलः अन्यतममतानुकूलो वा पन्थाः अनुसरणीयो भवति यः अल्पमतिभिः ग्रहीतुं न शक्यते । भट्टोजिदीक्षितेन तादृशानि स्थलानि न्यक्षेण परिशील्य सिद्धान्तभूतः अर्थः स्वग्रन्थेऽस्मिन् प्रकाशितः । तस्मात् वैयाकरणप्रक्रियया साधुशब्दस्वरूपस्य निर्णये अयं ग्रन्थः नितरामुपकारकः वरीवर्ति । अत्र अस्माकं पाठ्यक्रमे अयं ग्रन्थः द्वितीये सत्रे निवेशितः । अत्र संज्ञाप्रकरणम्, परिभाषाप्रकरणं, पञ्चसन्धिप्रकरणं अजन्तपुंलिङ्गप्रकरणं च इत्येते भागाः अध्याप्यन्ते । तत्र उपकारकाणां व्याख्याभागानामपि यथोचितं बोधनं भविष्यति ।

## 2. Course Objectives

अनेन क्रमेण अध्ययनस्य अन्ते छात्राः –

- सन्धिकार्याणि कर्तुं, कृतसन्धिकार्येषु प्रदेशेषु विभागं कर्तुं च प्रभवेयुः
- अजन्तपुंलिङ्गरूपाणां निष्पादने समर्था भवेयुः
- अनुवृत्त्यादिज्ञानपूर्वकं सूत्रार्थावगमे तद्व्याख्याने च पाटवं प्राप्नुयुः

- प्रकृतग्रन्थभागं प्रतिपङ्क्ति अधीत्य कस्यापि भागस्य व्याख्याने समर्थाः भवेयुः

## 3. Pre-requisites

- सरलसंस्कृतभाषाया ज्ञानम्
- व्याकरणशास्त्रस्य स्थूलरूपेण परिचयः

## 4. Readings

- सिद्धान्तकौमुदी, मोतिलाल बनरसीदास, भागः - १

## 5. Module-wise topics

The suggested structure is as follows:

**Module 1 – संज्ञा-परिभाषा-स्वरसन्धिप्रकरणानि** 16 sessions

**Objectives –**

- शास्त्रोपयोगिनीनां संज्ञानां परिभाषाणां च परिचयः
- स्वरसन्धिप्रकरणे विद्यमानां सूत्राणामर्थस्य अवबोधः
- एतस्मिन् विभागे विद्यमानां सूत्राणां व्याख्याने सामर्थ्यम्

**Topics –**

- संज्ञाप्रकरणम्
- परिभाषाप्रकरणम्

**Module 2 – स्वरसन्धिप्रकरणम् प्रकृतिभावश्च** 20 sessions

**Objectives –**

- एतद्भागान्तर्गतानां सर्वेषां सूत्राणाम् अर्थावबोधः
- तत्तत्सन्धिकार्यकरणे सामर्थ्यम्
- एतद्ग्रन्थभागाधारेण सन्धिकार्येषु साधुत्वासाधुत्वनिर्णये सामर्थ्यावाप्तिः

**Topics –**

- यण्सन्धिः, अयादिसन्धिः
- एकादेशाः, तत्र गुण-वृद्धि-पूर्वरूप-पररूपादेशाः
- प्रकृतिभावः
- प्लुतविधायकसूत्राणि
- प्रगृह्यसंज्ञाविधायकसूत्राणि

**Module 3 – हल्सन्धिप्रकरणम्** 12 sessions

**Objectives –**

- एतद्भागान्तर्गतानां सर्वेषां सूत्राणाम् अर्थावबोधः
- पाणिनीयप्रक्रियानुसारं तत्तच्छब्दनिष्पादने सामर्थ्यम्
- एतद्भागान्तर्गतानां सूत्राणां विवरणे सामर्थ्यम्
- असिद्धकाण्डस्थानां सन्धिकार्याणां करणे पाटवम्

**Topics –**

- श्चुत्वसन्धिः, ष्टुत्वसन्धिश्च
- पूर्वसवर्णः, छत्वम्, अनुस्वारः, आगमाः, परसवर्णः, रुत्वम्,

**Module 4 – विसर्गसन्धिप्रकरणं स्वादिसन्धिप्रकरणं च** 10 sessions

**Objectives –**

- एतद्भागान्तर्गतानां सर्वेषां सूत्राणाम् अर्थावबोधः
- पाणिनीयप्रक्रियानुसारं तत्तच्छब्दनिष्पादने सामर्थ्यम्
- एतद्भागान्तर्गतानां सूत्राणां विवरणे सामर्थ्यम्

**Topics –**

- विसर्गस्य सकारादेशः, जिह्वामूलीयोपध्मानीयौ, सत्वम्
- रुत्वम्, उत्वादयः, लोपः

**Module 5 – अजन्तपुंलिङ्गप्रकरणम्** 17 sessions

**Objectives –**

- एतद्भागान्तर्गतानां सर्वेषां सूत्राणाम् अर्थावबोधः
- पाणिनीयप्रक्रियानुसारं तत्तच्छब्दनिष्पादने सामर्थ्यम्
- एतद्भागान्तर्गतानां सूत्राणां विवरणे सामर्थ्यम्

**Topics –**

- अकाराद्यन्तानां शब्दानां प्रक्रिया

## 6. Pedagogy

अध्यापनपद्धतिः प्रायेण उपन्यासरूपा अभ्यासरूपा च भवति । अयं विषयः प्रक्रियाबहुलः इति कारणतः लेखनफलकस्य अधिकतया उपयोगः करिष्यते । ग्रन्थाध्ययनावसरे अपेक्षितानां भागानां व्याख्यानमपि बोधयिष्यते ।

## 7. Learning Outcome

एतं ग्रन्थभागमधीतवन्तः छात्राः अत्रत्यानां सर्वेषां सूत्राणामर्थं, तल्लाभप्रकारं च सम्यक् ज्ञात्वा तैः लक्ष्यसंस्कारं च कृत्वा सन्धिकार्याणि कर्तुं अजन्तपुंलिङ्गप्रातिपदिकानां सुबन्तरूपाणि निष्पादयितुं च शक्ताः भविष्यन्ति । सूत्राणामर्थस्य, प्रक्रियायाः ग्रन्थस्थानां शास्त्रीयविचाराणां च मौखिकनिरूपणे समर्थाः भविष्यन्ति ।

## 8. Evaluation Pattern

- कार्यसमर्पणम् २० अङ्काः
- प्रस्तुतिः १५ अङ्काः
- सत्रार्धपरीक्षा २५ अङ्काः
- सत्रान्तपरिक्षा ४० अङ्काः